भूष्णुः, त्रि, ( भू+गष्णु । ) भवनशीलः । तत्पर्य्यायः । भविष्णुः २ भविता ३ । इत्यमरः । ३ । १ । २८ । साधुभवनशीलः । इति तट्टीकायां रायमुकुटः ॥ ( यथा, मनौ । ४ । १३५ ।
"क्षत्रियं चैव सर्पं च ब्राह्मणञ्च बहुश्रुतम् ।
नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥"
"भूष्णुः, धनायुरादिना वर्द्धनशीलः ।" इति तट्टीकायां कुल्लूकभट्टः ॥ )

भूसुतः, पुं, ( भुवः पृथिव्याः सुतः । ) मङ्गलग्रहः । इति शब्दमाला ॥ ( यथा, सूर्य्यसिद्धान्ते । २ । ५५ ।
"मङ्गलाद्व्यौपरिधिः सप्तमे भृगुभूसुतौ ॥" ) सीतायाम् स्त्री ॥

भूस्तृणं, क्ली, ( भूलग्नं तृणं भुवस्तृणमिति वा । पारस्करादित्वात् सुट् । ) भूतृणम् । इत्यमरः । २ । ५ । १६७ ॥ ( यथा, मनौ । ६ । १४ ॥
"वर्जयेन्मधुमांसञ्च भौमानि कवकानि च ।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ॥" )
अस्य पर्य्यायगुणा यथा,—
"गुह्यबीजञ्च भूतीकं सुगन्धं गोमयप्रियम् ।
भूस्तृणन्तु भवेच्छत्रा मालातृणकमित्यपि ॥
भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं लघु ।
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम् ।
अवृष्यं बहुविट्कञ्च पित्तरक्तप्रदूषणम् ॥"
इति भावप्रकाशः ॥

भूस्पृक्, [ श् ] पुं, ( भुवं स्पृशतीति स्पृश् + क्विन् । ) मनुष्यः । इति हेमचन्द्रः । ३ । १ ॥

भूस्वर्गः, पुं, ( भुवि स्वर्ग इव अमरलोकधारणात् । ) सुमेरुपर्व्वतः । इति जटाधरः ॥

भृञ्, } भृतिपुष्ट्योः । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-सक०-
भृ ञि टु ञ } अनिट् । जि-ह्वा०-उभ०-सक०-अनिट् ।) भृतिर्भरणं पुष्टिः पोषणम् । ञि ञ "बिभर्त्ति शशिनं शम्भुर्बिभृते जनकः सुतम् । टु भरथुः । ञ भृत्रिमम् । भ्वादिपक्षे भृतिः पूरणम् । ञ भरति कुम्भमद्भिर्जनः । भरते । इति दुर्गादासः ॥

भृकुंशः, पुं, ( कुशि+अच् । कुशो भावदीपनम् । पृषोदरादित्वात् सस्य शत्वम् । भुवा कुशो भावप्रकाशः इङ्गितज्ञापनं यस्य । निपातनात् सम्प्रसारणम् । ) भ्रुकुंशः । स्त्रीवेशधारी नटपुरुषः । इत्यमरटीकायां रमानाथः ॥

भृकुंसः, पुं, ( चुरादौ पठ पुटेत्यादि दण्डकोक्तः कुसिर्भाषार्थः । स्त्रीवेशं धारयित्वा भ्रुवः कुंसयति युवत्वमिति संज्ञात्वादुकारस्य ऋकारः ह्रस्वश्च वा । कुसि+अच् । यद्वा भ्रुवा कुंस इङ्गितप्रकाशो यस्य । निपातनात् सम्प्रसारणम् । ) भ्रुकुंशः । स्त्रीवेशधारी नटपुरुषः । इत्यमरटीकायां रमानाथः ॥

भृकुंसकः, पुं, ( भृकुंस एवेति स्वार्थे कन् । ) भ्रुकुंशः । इति शब्दरत्नावली ॥

भृकुटिः, स्त्री, ( कुट कौटिल्ये इति कुट+इन् । भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसारणम् । ) भ्रूकुटिः । यथा,—
"रचितभृकुटिवन्धं नन्दिना द्वारि रुद्धे ।"
इति भरतधृतहरविलासः ॥

भृकुटी, स्त्री, ( भृकुटि । कृदिकारादिति ङीष् । ) भ्रूकुटिः । इत्यमरटीकायां भरतः ॥ भृकुटीकुटिलाननी । इति मार्कण्डेयपुराणे देवीमाहात्म्यञ्च ।

भृगुः, पुं, ( तपसा भृज्यते पच्यतपादिभिर्वेति । भ्रस्ज+"प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च ।" उणा० १ । २८ । इति कुः सम्प्रसारणं सलोपः, न्यङ्क्वादित्वात् कुत्वञ्च । यद्वा भृज्जतीति क्विप् । भृक् ज्वाला तया सहोत्पन्न इति उः ।) मुनिविशेषः । स तु ब्रह्मणस्त्वचो जातः । ( यथास्योत्पत्तिर्नामनिरुक्तिश्च महाभारते । १३ । ८५ । १०५—१०६ ।
"पुरुषा वपुषा युक्ताः स्वैः स्वैः प्रसवजैर्गुणैः ।
भृगित्येव भृगुः पूर्व्वमङ्गारेभ्योऽङ्गिराभवत् ॥
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् ।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृतः ॥" )
अस्य भार्य्या कर्द्दममुनिकन्या ख्यातिः । पुत्त्रः धाता विधाता च । कन्या श्रीः । इति श्रीभागवतम् । अपि च ।
मुनय ऊचुः ।
"कथितस्ते यदा सर्गः पृष्टः सूत त्वयाधुना ।
भृगुसर्गात् प्रभृत्येव सर्गो नः कथ्यतां पुनः ॥"
सूत उवाच ।
भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्व्वमुदधेः पुनः ।
तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ ॥
आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभोः ।
धातुर्विधातुस्ते भार्य्ये ययोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः ।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः ॥
ततो वंशो मुनिश्रेष्ठा विस्तरं भार्गवो गतः ।
इत्याग्नेये वह्निपुराणे वरसर्गं नामाध्यायः ॥ ॥
शिवः । शुक्रग्रहः । इति मेदिनी । गे, १५ ॥ सानुः । यमदग्निः । इति हेमचन्द्रः ॥ अत्युच्चसटङ्कवत्सुगिरिपार्श्वोच्चदेशः । गिरवकलगपर्व्वतादिपार्श्वः । आरड़ि इति ख्यातम् । यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति । अतएव भृगुपतनमित्यादिप्रयोगो दृश्यते । इति भरतः ॥ तत्पर्य्यायः । प्रपातः २ अतटः ३ । इत्यमरः ।२।३।४॥ दरद् ४ । इति जटाधरः ॥ पतनस्थानम् ५ । इति शब्दरत्नावली ॥

भृगुपतिः, पुं, ( भृगूनां तद्वंशीयानां पतिः । ) परशुरामः । इति शब्दरत्नावली ॥ ( यथा, गीतगोविन्दे । १ । १० ।
"केशवधृतभृगुपतिरूप ! जय जगदीश ! हरे !। तथा च मेघदूते । १ । ५६ ।
"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्चरन्ध्रम् ।" )

भृगुसुतः, पुं, ( भृगोः सुतः । ) शुक्रः । इति शब्दरत्नावली ॥ परशुरामश्च ॥

भृगुलापतिः, पुं, परशुरामः । इति शब्दरत्नावली ॥ भृगूणाम्पतिरित्यपि पाठः ॥

भृङ्गं, क्ली, ( बिभर्त्तीति । डु-भृञ् भरणे । "भृञः कित् नुट् च ।" उणा० १ । १२४ । इति गन् । स च कित् नुडागमश्च । ) त्वचम् । गुड़त्वक् इति ख्यातम् । इत्यमरः । २ । ५ । १६ । ( यथा,—
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गञ्चोचन्तथोत्कटम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । )
अभ्रकम् । इति राजनिर्घण्टः ॥

भृङ्गः, पुं, ( बिभर्त्त्यनुरागमिति । भृञ्+"भृञः कित् नुट् च ।" उणा० १ । १२४ । इति गन् ; स च कित् नुट् च । ) भ्रमरः । कलिङ्गपक्षी । इत्यमरः । २ । ५ । १६ । फिङ्गा इति भाषा ॥ ( अस्य पर्य्याया धूम्याटशब्दे द्रष्टव्याः ।) अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफशुक्रविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ विटूगः । भृङ्गराजः । इति मेदिनी गे, १५ ॥ ( यथास्य पर्य्यायः ।
"भृङ्गराजः केशराजो भृङ्गः पतङ्गः मार्कवम्
इति वैद्यकरत्नमालायाम् ॥
तथा च पर्य्यायान्तरम् ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भृङ्गारः । भृङ्गरोलः । इति शब्दरत्नावली ॥

भृङ्गकः, पुं, ( भृङ्ग । संज्ञायां कन् । ) राजवासनपक्षी । यथा,—
"अथ भृङ्गो भृङ्गराजो भृङ्गको राजवासनः ॥"
इति शब्दरत्नावली ॥

भृङ्गजं, क्ली, ( भृङ्ग इव जायत इति । जन+डः । ) अगुरु । इति रत्नमाला ॥ ( गुणाश्चास्यागुरुशब्दे विज्ञेयाः ॥ )

भृङ्गजा, स्त्री, ( भृङ्गज+स्त्रियां टाप् । ) भार्गी । इति राजनिर्घण्टः ॥

भृङ्गपर्णिका, स्त्री, ( भृङ्ग इव कार्ष्ण्यात् भृङ्गवर्णं पर्णमस्याः इति ङीष् । ततः स्वार्थे कन् टाप् । अत इत्वञ्च । ईकारस्य ह्रस्वत्वम् । ) सूक्ष्मैला । इति शब्दचन्द्रिका ॥

भृङ्गप्रिया, स्त्री, ( भृङ्गाणां प्रिया । प्रचुरमधुत्वात् । ) माधवीलता । इति राजनिर्घण्टः ॥

भृङ्गमूलिका, स्त्री, ( भृङ्गस्य भृङ्गराजस्येव मूलमस्याः कः । अजातित्वात् टाप् । कापि अत इत्वञ्च । ) भ्रमरच्छली । इति राजनिर्घण्टः ॥